[(1 1) Dg1 Cg जन , Dm1 बाल , L(ed) मन्त्रि- (for बल-) L (ed) सर्वे वचनमब्रुवन् (for the post half) G (ed) गुरवो मात्रगश्चैव पौरजानपदास्तथा —(1 2) G3 damaged up to समागत T2 च (for तु) Dt1 ते मन्त्रयितु (for मन्त्रयित्वा तु) Dg1 समता गतबुद्धय , T2 G1 Cr समागत°, M2 सम्यगागत°, Cm g t as above (for the post half) G (ed) समेत्य मन्त्रयामासुर्मन्त्रयित्वा च निश्चय]

—^{c}) Dd1 (marg) स्व- (for च) G3 M2 ध्यात्वा, Cg t as in text (for ज्ञात्वा) Ñ2 ऊचु समन्त्र्य ते सर्वे, V1 ऊचुस्ते स्वागत सर्वे, B1 2 ऊचु (G[ed] °चे) समतत सर्वे, M4

अनेकवर्षसाहस्रो वृद्धस्त्वमसि पार्थिव ।
स रामं युवराजानमभिषिञ्चस्व पार्थिवम् ॥ १५
इति तद्वचनं श्रुत्वा राजा तेषां मनःप्रियम् ।
अजानन्निव जिज्ञासुरिदं वचनमब्रवीत् ॥ १६
कथं नु मयि धर्मेण पृथिवीमनुशासति ।
भवन्तो द्रष्टुमिच्छन्ति युवराजं ममात्मजम् ॥ १७
ते तमूचुर्महात्मानं पौरजानपदैः सह ।
बहवो नृप कल्याणा गुणाः पुत्रस्य सन्ति ते ॥ १८
दिव्यैर्गुणैः शक्रसमो रामः सत्यपराक्रमः ।
इक्ष्वाकुभ्यो हि सर्वेभ्योऽप्यतिरिक्तो विशांपते ॥ १९
रामः सत्पुरुषो लोके सत्यधर्मपरायणः ।
धर्मज्ञः सत्यसंधश्च शीलवाननसूयकः ॥ २० G. 2 1 28 B. 2 2 31 L 2 4 17

ऊचु समतया सर्वे, L (ed) एव समस्य सहिता —^{d}) L (ed) ऊचुर् (for वृद्ध) T2 G1 M2 3 वच (for नृपम्) —For 14, Ś1 D1–7 subst

38* तस्य तद्वचन श्रुत्वा देवकल्पस्य धीमत ।
प्रिय चैवानुरूप च वक्तु समुपचक्रमु ।
[(1 1) D4 7 शर्व (for देव-)]

15 Ś1 D1–7 read 15–18, 41, 42* (D6 om 41*, 42*), 22^{cd} after 27 —^{a}) Ñ2 V1 B1 2 M4 -शतिको, D5 M4 (before corr) शतदो (for -साहस्रो) Ś1 D1–4 6 7 गतश्च सुमहान्कालो —^{b}) Ś1 V1 B1 2 D3–5 7 M4 वृद्धोस्यद्य (D4 °द्धस्याद्य, M1 °द्धोसि त्व) नरेश्वर (D3 नराधिप), Ñ2 D2 वृद्धो मान्यो (D2 ह्यसि) नरेश्वर, D1 6 वृद्धश्चारि नरेश्वर —G3 illeg for 15^{cd} —^{c}) D7 त्व (for स) D2 राजा (for राम) Ñ2 V1 B1 2 यौवराज्ये त्वम् (for युवराजानम्) —^{d}) Ś1 D1–4 6 7 रावव (L[ed] °व), T1 3 वार्मिकं (for पार्थिवम्) Ñ2 V1 B1 2 D5 M4 अभिषेक्तुमिहा (D5 °क्तु त्वम) र्हसि, T2 M2 3 °षेचय मा चिर —After 15, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

39* इच्छामो हि महाबाहु रघुवीर महाबलम् ।
गजेन महतायान्त राम छत्रावृताननम् ।

16 For sequence in Ś1 D1–7, cf v l 15 G3 partly damaged for 16^{ab} —^{a}) Ś1 D1–4 6 7 तेषा (for इति) Ś1 D3 4 6 7 तु (for तद्) D5 तेषा (for श्रुत्वा) B1 इति तेषा वच श्रुत्वा —^{b}) Ś1 D1 3 4 6 7 मनोज्ञं हृदयस्थि (D1 °येष्सि, D3 °य स्थि)त, Ñ2 V1 B1 2 D5 M4 तेषा (B1 तत, D5 श्रुत्वा) स्व (B2 सु) हृदयेप्सित, D2 हृद्य च मनसेप्सित —^{c}) Ś1 Ñ2 V1 B1 2 D1–7 M4 अनिच्छन् (for अजानन्) B2 D1 अपि (for इव) —^{d}) Ś1 D5 त जन प्र (D5 पुनस्तान्प्र) त्युवाच ह, Ñ2 V1 B1 2 M4 जनास्तान्प्रत्युवाच म (M4 ह), D1–4 6 ताञ्जनान्प्रत्युवाच रा (D4 ह), D7 ता प्रजनान्प्रत्युवाच ह (hypm) —After 16, Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

40* श्रुत्वैतद्वचन यन्मे राघव पतिमिच्छथ ।
राजान सशयोऽय मे किमिदं ब्रूत तत्त्वत ।
[(1 1) Dg1 T1 3 G M1 2 Cr g [ए]व (for [ए]तद्) G3 वर्म, M2 सर्वे (for यन्मे) —(1 2) Dt1 Dd1 Dm1 तद् (for किम्)]

17 For sequence in Ś1 D1–7, cf v l 15 —^{a}) G3 partly damaged Ś1 V1 D4 कथ नु, D1 अजस्र (for कथं नु) —^{c}) Ś1 Ñ2 B1 D6 M4 कर्तुम्, B2 D3–5 7 कृतम् (for द्रष्टुम्) D1 भवत कृतमिच्छतु, D2 भद्र न कर्तुमिच्छति —^{d}) V1 सुरराजं (for युव°) Dt1 महाबल (for ममात्मजम्).

18 For sequence in Ś1 D1–7, cf v l 15 —^{a}) Dt1 M2 महात्मान, D5 महीपाल —^{b}) Ś1 D1–4 6 7 वृद्ध दशरथ नृप, Ñ2 V1 B1 2 M4 पौरजानपदा जना, D5 °पदा पुन, T2 M3 °पदास्तदा —^{c}) D1–4 6 7 कृत- (for नृप) Dg1 Dd1 Dm1 D4 T2 G1 3 M2 Cm कल्याण Ś1 बहव कृतकल्याण- —^{d}) D2 मे (for ते) Ñ2 पुत्रस्य मति ते गुणा, Dt1 गुणा. मति सुतस्य ते, D6 गुणा प्रदित्यमात्यवत् —After 18, Ś1 D1–5 7 ins

41* पुत्ररते देवसदृश स्वाध्यायाचारसयुत ।
[D5 शश्वच्च देवकल्पश्च स्वाध्यायाचारसयुक्त]

Ś1 D1–5 7 cont, Ñ2 V1 B1 2 M4 subst for 22^{ab}

42* प्रियकृत्प्रियवादी च प्रजाना पितृमातृवत् ।
[D7 [इ]व (for च)]

On the other hand, Dg1 Dt1 Dd1 Dm1 S (except M4) ins after 18

43* गुणान्गुणवतो देव देवकल्पस्य धीमत ।
प्रियानानन्दनान्कृत्स्नान्प्रवक्ष्यामोऽद्य तान्शृणु ।
[(1 2) Dt1 G1 प्रियानानददान्, T2 G2 M1 3 °जान्, M2 °क्षान्, Cm g t as in text (for °नान्) ❀ Cv प्रियानानन्द-जननानिति पाठ । Cr आनन्दानिष्टनिवारणपृवकेष्टप्राप्तयेनानन्द-जनकान् । ❀ Dt1 कृत्वा (for कृत्स्नान्) G3 वक्ष्यामो अद्य (with hiatus) (for प्रवक्ष्यामोऽद्य)]

19 Ñ2 V1 B1 2 M4 om 19–21^{b} —^{a}) Ś1 D1–7 दक्ष- (for शक्र-) —^{b}) D2 शक्र (for सत्य-) Ś1 D1 3–7 राम शक्रसमो बले —^{c}) Dg1 Dt1 Dd1 Dm1 T G2 3 M1–3 [अ]पि (for हि) —^{d}) Ś1 D1–3 5 6 व्यतिरिक्तो, Dg1 Dt1 Dd1 Dm1 T G M1 2 व्यनिरिक्तो, D4 7 व्यतिरेक्तो (for ऽप्यति°)

20 Ñ2 V1 B1 2 M4 om 20 (cf v l 19) —^{a}) Ś1 D1–7 रामस्य (for राम सत्-) —^{b}) Dt1 G1 सत्य (G1 राम) सत्य- (for सत्यधर्म-) Ś1 D4 7 यशोगुणै, D1 2 5 -यशोबलै, G3 पराक्रम (for -परायण) D3 6 सत्त्वधर्मयशो-बलै —After 20^{ab}, Ś1 D1–7 ins

Anyal Research Team

क्षान्तः सान्त्वयिता श्लक्ष्णः कृतज्ञो विजितेन्द्रियः ।
मृदुश्च स्थिरचित्तश्च सदा भव्योऽनसूयकः ॥ २१
प्रियवादी च भूतानां सत्यवादी च राघवः ।
बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता ॥ २२
तेनास्येहातुला कीर्तिर्यशस्तेजश्च वर्धते ।
देवासुरमनुष्याणां सर्वास्त्रेषु विशारदः ॥ २३

44* समो न विद्यते कश्चिद्विशिष्ट कुत एव तु ।
[D₆ वा (for तु)]
On the other hand, Dg₁ Dt₁ Dd₁ Dm₁ T G M₁₋₃ ins after 20^{ab}

45* साक्षाद्रामाद्विनिर्वृत्तो धर्मश्चापि श्रिया सह ।
प्रजासुखत्वे चन्द्रस्य वसुधाया क्षमागुणे ।
[(1 1) G₂ M₁ धर्माद्, M₃ रामो (for रामाद) —(1 2) M₃ प्रजा सुखयतेंद्रस्य (for the prior half) M₃ वसुधाया Dg₁ क्षमागुणे]
Thereafter the above MSS repeat 2 1 26^{ef} —^{cd}) D₁₋₇ धर्मात्मा सत्यवादी च(D₇ °दीव) (for 20^{c}) T₂ G₁ वीर्यवान्, Cg as in text (for शील°) D₁ ₃₋₆ अनुसूयक (for अन°) ❀ Cv अनसूयक इति द्विरुपादानात्स्वयमन्यस्मै नासूयको भवतीत्येकम् पुरुष । स्वस्मै चान्योनासूयको विद्यत इत्यन्यो बहुव्रीहिर्वेदितव्य । ❀ Ś₁ धर्मज्ञानसूयी च सत्यवान्प्रलवान्तथा

21 Ñ₂ V₁ B₁ ₂ M₄ om 21^{ab} (cf v l 19) G₁ om 21 —^{a}) D₁ ₃ ₅ दात, T₂ M₂ क्षाता, G₁ ₂ M₁ क्षता, Cg as in text (for क्षान्त) D₆ (before corr) सात्वयित्वा D₁ ₃ ₅ T₂ M₂ ₃ शक्त, T₁ ₃ शक्य, Cm g t as in text (for श्लक्ष्ण) Ś₁ D₄ ₆ ₇ दात सत्वहित प्राज्ञ, D₂ दात शातो यतो वश्य —^{c}) Ś₁ D₆ बुद्धिश्च, D₁ ₃ ₄ -बुत्तिश्च, D₂ ₅ -बृत्तश्च, T₃ चित्तस्य (for -चित्तश्च) Ñ₂ V₁ B₁ ₂ M₄ मृदुश्च देवसत्वश्च —^{d}) Ś₁ D₁₋₇ नित्य दीनानुकपक (D₆ °न), Ñ₂ V₁ B₁ ₂ M₄ साध्या(V₁ M₁ सदा)चारोनसूयक

22 For 22^{ab}, Ś₁ D₁₋₇ subst

46* प्रियवादी जितक्रोधो दीर्घदर्शी महामति ।,
[D₂ -दृष्टिर् (for -दर्शा) D₁ -धृति (for -मति)]
while Ñ₂ V₁ B₁ ₂ M₄ subst 42* for 22^{ab} —Ś₁ D₁₋₅ ₇ read 22^{cd} after 42*, D₆ after 18 all for the first time —After 22, Ś₁ Ñ₂ V₁ B₁ ₂ D₁₋₇ M₄ (Ś₁ D₁₋₇ after the first occurrence of 22^{cd}) ins

47* नियन्ता दुर्विनीताना विनीतप्रतिपूजक ।
न ज्ञातिषु न मित्रेषु न च जानपदेष्वपि ।
जनोऽस्त्यगुणवादी यो रामस्य भुवि भूपते ।
सवृद्धबाला पौरास्ते तथा जानपदा जना । [5]
गुणानुरक्ता राजेन्द्र रामभिच्छन्ति भूमिपम् ।
गुणकीर्त्या नरपते प्रजा रामेण रञ्जिता ।
कृती रामो धनुर्वेदे दिव्यास्त्रे चैव सयुगे ।
अमोघास्त्रो दूरपाती चित्रयोधी दृढायुध ।
[Ś₁ D₁ ₃ ₇ om 1 1 —(1 1) D₆ दुष्टानां निग्रहे च (for the prior half) B₂ D₁ धर्मज्ञ —(1 2) D₂ सर्वासु (for ज्ञा°) Ñ₂ V₁ P₁ ₂ D₄ M₄ धर्मज्ञ (for विद्यु) Ñ₂ V₁ च (for [ज]ति) —(1 3) Ś₁ V₁ B₂ M₄ [ज]ज्ञ, D₁ [ज]ति, D₂ ति (for ज्ञित) D₁ ₃ ₇ (for को) D₁ ₃ तिर्यो D₄ भूमि (for भूपो) Ñ₂ सत्यानृशंस्य च (for the post half) —(1 4) B₁ partly damaged D₁ विक्रम D₂ ₄ पराक्रम (for मान°) —(1 5) Ñ₂ V₁ B₁ ₂ D₄ रामम् (for रामेन्द्र) M₃ गुणानुरक्तो राम च (for the prior half) D₆ रामम् (for रामम्) M₃ ₄ °र्त्या —(1 6) D₄ सुतो (for सुतो) —After 1 6, V₁ M₄ ins

47(A)* भरतेन यथान्यायं विधिनेह महात्मना ।
Ś₁ D₁₋₇ om 1 7-8 —(1 7) Ñ₂ B₁ शिक्षास्त्र M₄ शिक्षास्त्रविशारदम्, G (ed) शिक्षास्त्रविशारदो (for the post half) —(1 8) Ñ₂ B₁ (exp for as above) दृढव्रतो M₄ °धृतो (for °धृती)]
Ś₁ D₁₋₇ cont

48* पुरस्कृत्य वचो राज्ञ स्त्रियाना मन्त्रिणामपि ।
हर्षं परमुपागच्छत्तेषा भावज्ञता प्रति ।
[(1 1) D₇ तु राज्ञो, D₄ तु राज्ञा च, D₆ स तूपरोधं (for वचो राज्ञा) D₁ ₂ ₅ तुला राज्ञा (for the prior half) —(1 2) Ś₁ D₁ हर्षवान्, D₁ ₂ परमं (by transp) D₆ तां परमामाप्ता (for the prior half) Ś₁ D₁ ₂ भावज्ञान्, D₂ भावज्ञा (sic) (for भावज्ञता)]
—After the above, Ś₁ D₁ ₂ ₄₋₇ repeat 2 1 34^{cd}

23 Ñ₂ V₁ B₁ ₂ M₄ om 23 —^{a}) Ś₁ D₁₋₇ तरय, T₂ G₁ [ह]ह्यन्य, M₂ चाम्य, M₃ [ह]स्येन (for [ह]स्येह) —^{b}) D₁ वर्धित, D₆ वा भवेत (for वर्धते) —After 23^{ab}, Ś₁ D₂₋₇ ins

49* समाप्तश्च धनुर्वेदे हयपृष्ठे गजे रथे ।
लब्धश्च शब्दवेधी च दूरपाती दृढायुध ।
[(1 1) Ś₁ D₆ समाप्त (for समाप्तश्) D₃ (with hiatus) अथ (for एव) D₂ गजे रथे, D₄ रथे गजे (by transp) —D₄ om from 1 2 up to 23^{cd} —(1 2) Ś₁ D₂ ₆ लब्धा(D₂ °ध्वा)स्त्र (for लब्धश्च) D₃ शस्त्र- (for शब्द-) D₆ लब्धशस्त्र शब्दवेधी Ś₁ D₁ ₅-(D₆ before corr.): दूरपाती D₂ च राघव (for दृढ युध)]
—For similar lines in 47* and 24-34^{d}, cf App 1 (No 5)
—After 23^{c}, Ś₁ D₁₋₃ ₅₋₇ ins

50* सयुगेष्वपराजित ।
दिव्यमानुषसस्थेषु

यदा व्रजति संग्रामं ग्रामार्थे नगरस्य वा ।
गत्वा सौमित्रिसहितो नाविजित्य निवर्तते ॥ २४

संग्रामात्पुनरागम्य कुञ्जरेण रथेन वा ।
पौरान्स्वजनवन्नित्यं कुशलं परिपृच्छति ॥ २५

पुत्रेष्वग्निषु दारेषु प्रेष्यशिष्यगणेषु च ।
निखिलेनानुपूर्व्या च पिता पुत्रानिवौरसान् ॥ २६

शुश्रूषन्ते च वः शिष्याः कच्चित्कर्मसु दंशिताः ।
इति नः पुरुषव्याघ्रः सदा रामोऽभिभाषते ॥ २७

व्यसनेषु मनुष्याणां भृशं भवति दुःखितः ।
उत्सवेषु च सर्वेषु पितेव परितुष्यति ॥ २८

सत्यवादी महेष्वासो वृद्धसेवी जितेन्द्रियः ।
वत्सः श्रेयसि जातस्ते दिष्ट्यासौ तव राघवः ।
दिष्ट्या पुत्रगुणैर्युक्तो मारीच इव कश्यपः ॥ २९

G 2 1 38
B 2 2 49
L 2 4 27

[(1 1) D2 सग्रामेषु (for सयुगेषु) Ś1 पराजित (for [अ]परा°) —(1 2) Ś1 -मानुष्य-, D5 -मानव- (for -मानुप-)] —[a]) D5 सर्वशास्त्रे, G1 सर्वशास्त्रेषु (hypm) (for सर्वास्त्रेषु) —After 23, Dg1 Dt1 Dd1 Dm1 T G M1–3 repeat lines 9–10 of 14*, followed by 2 1.18

24 [a]) Ñ2 V1 B1 2 M4 यं य (for यदा) T2 सग्रामे Ś1 D1–4 6 7 य चो(D7 यश्चो)पयाति संग्रामे, D5 य च प्रयाति सग्रामे —[b]) G3 रामार्थे (sic) (for ग्रा°) Dt1 Dm1 च (for वा) Ś1 D1–7 ग्रामाते नगरेपि वा (D7 च), Ñ2 V1 B1 2 M4 राजग्रामं(M4 रामो राज)स्वाज्ञया —For 24[cd], Ś1 D1–7 subst

51* गत्वा सौमित्रिणा सार्धं त जित्वोपनिवर्तते ।,

[D6 (by corr) साक (for सार्धं) D4 7 विजित्य (for त जित्वा) Ś1 D6 विनिवर्तते (for [उ]पनि°)]
while Ñ2 V1 B1 2 M4 subst for 24[cd]

52* ततस्ततो विजित्यारीन्विजयी विनिवर्तते ।

[M4 सुतो (for ततो) Ñ2 विजित्वा (for °त्य)]
Ñ2 V1 B1 2 M4 cont

53* जित्वा जित्वारिसैन्यानि यदाय विनिवर्तते ।
तदापि प्रश्रिततरो भूत्वा न पूजयत्युत ।

[Cf lines 10–11 of App I (No 5) —V1 M4 om 1 1 —(1 1) Ñ2 (marg) विजित्वा परसैन्यानि, G(ed) जित्वापि चारिसैन्यानि (for the prior half) —(1 2) V1 प्रसृततरो, M4 चाशु भवतो (for प्रश्रिततरो)]

25 [a]) Dt1 G3 आगत्य (for °म्य) Ś1 समग्रे नगरे गच्छन्, Ñ2 V1 B1 2 M4 प्रवासात्पुनरागत्य(M4 °म्य), D1–3 5 सदाग्रे(D5 °र्वाग्रे) निर्भय गच्छन्, D4 6 7 सदाग्रे(D6 °दारे) नगराद्गच्छन् —[b]) Ñ2 B1 2 Dg1 D2 4 च (for वा) —[c]) Ś1 D1–4 7 राजमार्गेण(D1–3 °पि) नो दृष्ट्वा, Ñ2 V1 B1 2 D6 M4 राजमार्गेपि दृष्ट्वा न (D6 निर्दृष्ट्वा), D5 राजमार्गे कुपितो दृष्ट्वा (sic), G1 पौरान्कुशलयन्नित्य —[d]) Ñ2 V1 B1 2 M4 स्थित्वा पृ(M4 °तान्पृ)च्छत्य(B2 °ट)नामय

26 V1 om 26–30 —[a]) Ñ2 B1 2 D1 M4 अग्निहोत्रेषु Ñ2 देवेषु, D2 दारासु (sic) (for दारेषु) —[b]) Ñ2 D1 शिष्यप्रेष्य- (by transp), B1 शिष्य –, D4 प्रेष्ये शिष्य-, D5 पुत्रशिष्य- (for प्रेष्य°) Ñ2 B1 2 -जनेषु, G2 -गुणेषु (for -ग°) M4 शिष्ये प्रेष्यजनेपि च —After 26[ab], Ñ2 B1 2 M4 ins

54* सानुकम्प सदा राम पृच्छत्यस्माननामयम् ।

[M4 अनुकपन्नित्र सदा (for the prior half)]

—Ñ2 B1 2 M4 om 26[c]–30 —[c]) Ś1 D4 6 7 -पूर्व्येण, Dm1 T1 2 G1 3 M3 -पूर्व्याच्च, D1–3 5 -पूर्वेण, T3 -पूर्व्याश्च, G2 M2 -पूर्वाच्च (for -पूर्व्या च) Cg आनुपूर्व्यात् —[d]) G1 सीता- (for पिता) D5 पुत्रमिवौरस

27 Ñ2 V1 B1 2 M4 om 27 (cf v l 26) —[a]) Ś1 D3–7 शुश्रूषति, T2 G3 शिश्रूषते (sic) Ś1 Dt1 Dm1 D2 3 6 M2 वच, Dg1 च वच (hypm) (for च व) D6 शिष्य —[b]) Ś1 D1 4–7 G3 कश्चित् (sic), D3 कचित्, T2 नित्य (for कचित्) Dt1 वर्मसु, Dd1 G3 M3 Ctp धर्मेषु, Dm1 वर्मेषु (for कर्मसु) Ś1 D6 देशिता (for द°) —[c]) B (ed) व (for न) D1 3 5 पुरुषव्याघ्र (for °घ्र) D6 इति स्म विदुषो वृद्धान्

28 Ñ2 V1 B1 2 M4 om 28 (cf. v l 26) —[a]) Ś1 D1–7 च सर्वेषा (for मनुष्याणा) —[b]) G1 सदा (for भृश) —[c]) Ś1 D1–7 श्रुत्वा चा(D6 दृष्ट्वा नो, D7 श्रुत्वा वा)भ्युदय किंचित् —[d]) D2 स चैव (for पितेव) D3 -दुष्यति (sic), D7 -नुष्यति (for -तुष्यति)

29 Ñ2 V1 B1 2 M4 om 29 (cf v l 26) Ś1 D1–7 read 29[ab] after 2 1 25 —[a]) Ś1 D1–7 महोत्साहो (for महेष्वासो) —After 29[ab], Dg1 Dt1 Dd1 Dm1 T G M1–3 ins

55* स्मितपूर्वाभिभाषी च धर्मं सर्वात्मनाश्रित ।
सम्यग्योक्ता श्रेयसा च न विगृह्य कथारुचि ।
सूश्रायतताम्राक्ष साक्षाद्विष्णुरिव स्वयम् ।
रामो लोकाभिरामोऽय शौर्यवीर्यपराक्रमै ।
प्रजापालनसयुक्तो न रागोपहतेन्द्रिय । [5]
शक्तस्त्रैलोक्यमप्येष भोक्तु किं नु महीमिमाम् ।
नास्य क्रोध प्रसादश्च निरर्थोऽस्ति कदाचन ।
हन्त्येष नियमाद्ध्यानवध्येषु न कुप्यति ।
युनक्त्यर्थै प्रहृष्टश्च तमसौ यत्र तुष्यति ।

Arya Research Team

बलमारोग्यमायुश्च रामस्य विदितात्मनः ।
आशंसते जनः सर्वो राष्ट्रे पुरवरे तथा ॥ ३०
अभ्यन्तरश्च बाह्यश्च पौरजानपदो जनः ।
स्त्रियो वृद्धास्तरुण्यश्च सायं प्रातः समाहिताः ॥ ३१
सर्वान्देवान्नमस्यन्ति रामस्यार्थे यशस्विनः ।
तेषामायाचितं देव त्वत्प्रसादात्समृध्यताम् ॥ ३२

राममिन्दीवरश्यामं सर्वशत्रुनिबर्हणम् ।
पश्यामो यौवराज्यस्थं तव राजोत्तमात्मजम् ॥ ३३
तं देवदेवोपममात्मजं ते
सर्वस्य लोकस्य हिते निविष्टम् ।
हिताय नः क्षिप्रमुदारजुष्टं
मुदाभिषेक्तुं वरद त्वमर्हसि ॥ ३४

इति श्रीरामायणे अयोध्याकाण्डे द्वितीयः सर्गः ॥ २ ॥

[(1 1) T3 -पूर्वाभिभाषे G3 श्रुत (for [आ]श्रित) —(1 2) T2 विरुद्ध-, G M1-3 विग्रह-, Cr m g t as above, Ct विगर्ह्य (for विगृह्य) —After 1 2, all the above MSS repeat 1 5 of 14* —(1 5) Cg प्रजापालनतत्त्वज्ञ Dg1 (before corr) रोगोपहतेंद्रिय, Dt1 रागोपहित प्रिय, G2 M3 रागोपहि°, Cg as above —(1 8) Γ G1 2 M1 3 Cg [ए]व (for [ए]प) G1 नियत (for °माद्) Dg1 अवधे खलु, G1 3 °ध्ये न च, Cg न वध्ये न च (for °ध्येषु न) T G2 M1-3 यद्येष(G2 °द्येव, M2 °देष) खलु(G2 M1 2 परि) कुप्यति(T2 °ते [sic]) (for the post half) —(1 9) T2 युनक्तद्धे (sic) (for °वत्यर्थं) T2 चेत् (for च) M2 मनसा (for तमसो) Dg1 तुष्यते, G2 तिष्ठति (for तुष्यति)]

Thereafter all the above MSS repeat 2 1 27-28 —c) Dg1 D2 T1 3 G1 3 M1-3 वत्स (sic), D5 वत्से (for वत्स) —d) D6 वत (metathesis) (for तव) Ś1 D5 7 G2 3 M1 2 राघव —e) Ś1 D1-7 रामो (for पुत्र-) —f) Dg1 Dm1 D7 S (except M4) काश्यप, Ct as in text

30 Ñ2 V1 B1 2 M4 om 30 (cf v l 26) —a) D5 आयुष्य (for °श्च) —After 30ab, Dg1 Dt1 Dd1 Dm1 T G M1 ins, M2 3 ins after 30

56* देवासुरमनुष्येषु सगन्धर्वोरगेषु च ।

[G M1 गधर्वैपूरगेषु च, M2 गधर्वोरगजातिषु (for the post half)]

—c) Ś1 D1-5 7 आशासते, D6 आशास्ते हि, G3 M1 Cr आशसते, Cm g t as in text (for °सते) Ś1 D1-5 7 G3 M1-3 जना सर्वे(D5 [before corr] °त्वे) (for जन सर्वो) —d) Ś1 D1-7 राष्ट्रेषु नगरेषु च

31 a) Ś1 D1 3 आभ्यतराश्, Ñ2 V1 B1 2 M4 आ(Ñ2 M4 आ)भ्यतरे, Dg1 Dt1 Dd1 D7 T1 G2 M1 3 Cm g t आभ्यतराश्, D2 4 5 अभ्यतराश्, Cr as in text (for °रश्) Ś1 D1-5 (before corr as in text) बाह्याश्च, Ñ2 B1 राज्ये च, V1 B2 M4 बाह्ये च, G1 बाहुश्च (for बाह्याश्च) D6 अर्धा तु वसुधायास्ते —b) Ś1 D1-7 G2 M1 पौरजानपदा जना, Ñ2 V1 B1 2 M4 पौरजानपदे तथा(M4 जने) —d) Dg1 प्रीतः (sic), D6 तस्य (sic) (for प्रात) D1 5 समाहित Ñ2 V1 B1 2 M4 देवान्राजन्गृहे गृहे

32 a) D1 सर्वे देवान्, D2 3 सर्वे देवा, D5 सर्वेदेवान्; D6 सर्व एव (for सर्वान्देवान्) —b) Ś1 D1 3-7 महात्मन; Dt1 Dd1 Dm1 मनस्विन, D2 न संशय (for यशस्विन). —For 32ab, Ñ2 V1 B1 2 M4 subst

57* रामस्यैवाभियाचन्ते यौवराज्याभिषेचनम् ।

[M4 अभियाचति रामस्य (for the prior half) B1 पौरराज्याभिषेचन, G(ed) योवराज्येभिषेचन (for the post half)]

—D5 reads 32cd in marg —c) Ñ2 V1 Dg1 M4 तामाम् (for तेषाम्) Ś1 D6 आशंसित, Ñ2 V1 स(V1 तु)याचित, Dg1 D3-5(before corr) 7 T2 G3 अयाचित, Dt1 D5 G1 Ct तद्याचित, D2 त्वमर्चित, Cm g as in text (for त्वयाचित). Ś1 D1-7(D5 [by corr] as in text) चैव, Ñ2 V1 B1 2 M4 राजस् (for देव) —d) Ś1 D1-7 (D5 [by corr] as in text) च युज्यता, Ñ2 V1 B1 M4 प्रसिध्यता (for समृध्यताम्) B2 त्वत्प्रसादेन सिध्यता

33 a) Ś1 D2-5 7 वीरम् (for रामम्) —b) Ñ2 V1 B1 2 D1 M4 प्रजानामनु(Ñ2 °मुप)रजक(B1 2 °कपक). —c) Ś1 पश्येमो, D2-7 पश्येम (for पश्यामो) Ñ2 V1 B1 2 D1 M4 पश्येम यु(B2 °युर्यु)वराज तम्(D1 M4 °जानम्). —d) Ś1 D2-7 राम(D4 °मे) राजीवलोचन, Ñ2 V1 B1 2 D1 M4 अभिषिक्त त्वदा(Ñ2 V1 तवा)ज्ञया

34 a) Ś1 एव (for देव-) ❀ Cg देवेति सबुद्धि । देवदेव विष्णु तत्सदृशमिति वा। ❀ Ś1 D1-7 आत्मवत (for °ज ते) —b) D4 सुखे (for हिते) D2 विनिष्ट (metathesis) —c) M3 om न (subm) Ś1 D1-7 अतीव न (Ś1 D4 6 7 त) क्षिप्र(D1 क्षत्र)मुदारसत्त्व(D2 °भाव). —d) Dg1 G1 वरद Ś1 D1-7 पुरेभिषेक्तु वरदार्हसि त्वं. —For 34, Ñ2 V1 B1 2 M4 subst

३

तेषामञ्जलिपद्मानि प्रगृहीतानि सर्वशः ।
प्रतिगृह्याब्रवीद्राजा तेभ्यः प्रियहितं वचः ॥ १
अहोऽस्मि परमप्रीतः प्रभावश्चातुलो मम ।
यन्मे ज्येष्ठं प्रियं पुत्रं यौवराज्यस्थमिच्छथ ॥ २
इति प्रत्यर्च्य तान्राजा ब्राह्मणानिदमब्रवीत् ।
वसिष्ठं वामदेवं च तेषामेवोपशृण्वताम् ॥ ३
चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः ।
यौवराज्याय रामस्य सर्वमेवोपकल्प्यताम् ॥ ४

G 2 2 5
B 2 3 4
L 2 5 4

58* स राजवर्यात्मजमात्मवन्त
गुणाभिराम नरलोककान्तम् ।
राम नृदेवार्हसि लोकनाथ-
मिहाभिषेक्तुं युवराजमुर्व्याम् ।

[Cf lines 18–21 of App I (No 5) —(1 1) V1 आत्मज न (for °वन्त) M4 स राजवर्यं समये भवन्त —(1 2) Ñ2 -वास (for -राम) —(1 3) V1 तदेव (for नृदेव) —(1 4) Ñ2 V1 अथ (for इह) V1 [अ]भिषिक्त (for °षेक्तु)]

Colophon missing in Ñ1, om in Ñ2 B1 2 —*Kāṇḍa name* om in Ś1 D6, D1 अयोध्यापर्वणि —*Sarga name* Ś1 D1–4 7 प्रकृतिवाक्य, V1 रामप्रशसा, D5 दशरथ प्रति पौरवाक्य, D6 प्रकृतिसमागम, G(ed) रामाभिषेकव्यवसायो —*Sarga no* (figures, words or both) Ś1 D6 om V1 1, D1 57, D2 4 7 4, D3 48, D5 5 —After the colophon, D6 concludes with रामाय नम, G M1 2 श्रीरामाय नम

3

☞ This Sarga is missing in Ñ1 and Ck (cf v l 2 1 1) B3 4 begin from this Sarga Before st 1, Ñ2 begins with ॐ नमो भगवते रामचन्द्राय। and then ins

59* नमस्तस्मै मुनीशाय श्रीयुताय तपस्विने ।
शान्ताय वीतरागाय वाल्मीकाय नमो नम ।
जयति रघुवशतिलक कौसल्यानन्दिवर्धनो राम ।
दशवदननिधनकारी दाशरथि पुण्डरीकाक्ष ।
जयति जनकपुत्रीवल्लभो रावणारि- [5]
र्दैगरथसुतराम कोसलेयो जितारि ।
अमररिपुगणारिर्मेध्वरि कैटभारि-
र्हरतु सकलपाप पूतनारिर्मुरारि ।
रामरामेति रामेति कूजन्त मधुराक्षरम् ।
आरुह्य कविताशाखा वन्दे वाल्मीकिकोकिलम् । [10]

Before st 1, B1 begins with ॐ नमो गणपतये। and ins

60* वेदे रामायणे चैव पुराणे भारते तथा ।
आदौ चान्ते च मध्ये च हरि सर्वत्र गीयते ।

Before st 1, B2 begins with ॐ नम श्रीरामाय। and ins lines 3–4 of 59*

Before st 1, B3 begins with ॐ रामचन्द्राय नम and then ins 59* B4 begins with ॐ नमो रामचन्द्राय Thereafter ins lines 9–10 of 59*, B1 ins the same after 60* (om second रामेति in l 9) B1 3 4 read आरूढकविताशाख for the prior half of l 10

—Before st 1, D5 ins a passage given in App I (No 5) Dm1 begins with ॐ

1 *a*) Ś1 Ñ2 V1 B D1–7 M4 -मालास्ता, D5 (also by corr *sec m*) -लाभास्तान (for -पद्मानि) B1 (gloss) प्रजा —*b*) M3 नि- (for प्र) Ś1 Ñ2 V1 B D1–7 M4 प्रतिगृह्य समतत (Ś1 D1–4 7 विशापति) —*c*) Ś1 D1–4 7 सप्रहृ(D1 स प्रहृ, D2 स प्रकृ)ष्टोब्रवीत्पौरान्, Ñ2 V1 B D5 6 M4 हृ(B2 [before corr] कृ, D6 तु)ष्टो दशरथो राजा —*d*) Ś1 D3 4 7 स तान्, D1 2 सता (for तेभ्य) Dt1 (before corr) प्रिय (for प्रिय-) Ñ2 V1 B D5 6 प्रोवाचेद वचस्तदा, M4 प्रोवाच वचन तदा

2 *a*) Ś1 D1 2 4 7 अत्र, D3 अद्य, G1 अजो (sic) (all to avoid hiatus!) (for अहो) ❀ Cr g अहोस्मीति सधिरार्ष। ❀ D7 [अ]स्मिन् (for ऽस्मि) M2 परम (for °म-) Ñ2 V1 B D6 धन्योस्म्यनुगृहीतोद्य, D5 M4 अहोस्म्यनुगृहीतोद्य(D5 °य) —*b*) M3 प्रभवश् (sic) Ś1 D1–4 7 ला(Ś1 D2 लो)भश्चानुत्तमो(D3 °द्य परो) मम(D2 °हान्), Ñ2 V1 B D5 6 M4 भवद्भि प्रिय(D6 मत्य)वादिभि —*c*) Ś1 Dd1 (before corr) D2 4 7 जन्म, G1 3 धर्मे (for यन्मे) D5 राम (for पुत्र) —*d*) Ś1 यौवराज्य यदीप्स्यथ, Ñ2 V1 B D6 युवराजमिहेच्छथ, D1–4 7 यौवराज्ये यदीप्स्य(D1 2 °दिच्छ, D3 °दीच्छ)थ, D5 M4 युवराजानमिच्छथ

3 *a*) Ś1 Dt1 D1 4 7 M2 (*inf lin* as in text) Ct प्रत्यर्चितान्, G2 3 °र्चितान् (sic) (for °र्च्य तान) ❀ Cg ब्राह्मणान अभ्यर्च्य मधुरवचनं समान्य। ❀ Ś1 D4 7 G2 M1 सर्वान् (for राजा) Ñ2 V1 B D5 6 M4 इति(M4 °त्य) राजानुभाव्यैतान्(B2 3 [also marg *sec m*] °नान, D5 °न, M4 °व), D2 इति प्रत्यब्रुवाद्राजा (sic) —*b*) Ñ2 V1 B D5 M4 एव भू(D5 M4 पौरान्भू)योब्रवीद्वच (D5 °द्विद), D6 इद वचनमब्रवीत् —*c*) T3 वासिष्ठ D3 om च (subm) —*d*) B1 एषाम्, D3 om (for ते°) Ś1 T3 चैव (for एव) D6 7 [ध]थ (for [उ]प-)

4 *b*) B1 D1 2 पुण्य, D6 शुभ (for पुण्य) D3 वन पुष्पितपादप —*c*) D3 यौवराजाय D6 कामस्य (for रा°)

कृतमित्येव चाब्रूतामभिगम्य जगत्पतिम् ।
यथोक्तवचनं प्रीतौ हर्षयुक्तौ द्विजर्षभौ ॥ ५
ततः सुमन्त्रं द्युतिमान्राजा वचनमब्रवीत् ।
रामः कृतात्मा भवता शीघ्रमानीयतामिति ॥ ६
स तथेति प्रतिज्ञाय सुमन्त्रो राजशासनात् ।
रामं तत्रानयांचक्रे रथेन रथिनां वरम् ॥ ७
अथ तत्र समासीनास्तदा दशरथं नृपम् ।
प्राच्योदीच्याः प्रतीच्याश्च दाक्षिणात्याश्च भूमिपाः ॥ ८

D₅ रामस्य यौवराज्याय (by transp) —^{d}) D₅ reads in marg Dg₁ Dm₁ D₁₋₃ ₅ ₇-कल्पता In D₆ दातुमस्य रोचते is written and crossed —For 4^{cd}, Ñ₂ V₁ B M₄ subst

61* रामाय यौवराज्य मे दातुमत्रैव रोचते ।

[Ñ₂ partly illeg M₄ रामस्य (for रामाय) B₄ अस (for अत्र) M₄ [अ]भि (for [ए]व)]

—After 4, Ś₁ D₁₋₄ ₇ ins , D₅ ins after 1 2 of 63*

62* श्रोभूते पुष्ययोगेन ब्रूत वो यदि रोचते ।
अथाब्रुवन्द्विजा सर्वे पूर्वमेव नराधिपम् ।
रामो वाग्भिर्मनोभिश्च अभिषिक्तो हि नागरैः ।
तेषा तद्वचन श्रुत्वा पौराणा हर्षसंभव ।
सघशोऽभून्महान्शब्द साधु साध्विति जल्पताम् । [5]

[(1 1) D₁ ₂ पुष्ययोगे च, D₃ °मयोगे (for °योगेन) D₃ भवतो (for ब्रूत वो) —(1 2) Ś₁ D₄ ₇ नरा (for द्विजा) Ś₁ एवम् (for एव) Ś₁ (*sup lin* also as above)उद्वाहन, D₇ नराधिप —(1 3) D₅ (to avoid hiatus) स्वभिषिक्तो D₅ अस्माक हीष्मितो नृप (for the post half) —(1 4) Ś₁ D₄ ₇ तत्र हर्षज (for हर्षसभव) —(1 5) Ś₁ D₁ महा- (for महान्) D₁ ₃ ₅ शसता (for जल्पताम्) D₂ मेघानामिव नि स्वन (for the post half)]

—After the above, Ś₁ D₁₋₅ ₇ ins a passage given in App I (No 6), Dg₁ Dt₁ Dd₁ Dm₁ T G M₁₋₃ ins it after 4, V₁ B₄ (om some lines) after 1 2 of 63* —Ñ₂ V₁ B D₅ ₆ M₄ ins after 4

63* आभिषेचनिक द्रव्य भवन्तो ज्ञापयन्तु माम् ।
यन्मया चोपहर्तव्य रामराज्याभिषत्तये ।
तौ तथेति प्रतिज्ञाय नृपतेर्वचनं तदा ।
लेखयाचक्रतुर्द्रव्य भूयश्चैव ननन्दतु ।

[(1 1) D₅ अभिषेचनिक D₆ सर्व (for द्रव्य) D₅ यापयतु D₆ यत्किंचिद्भावयतु मा (for the post half) —(1 2) D₅ M₄ [अ]त्र (for च) D₅ कर्तव्य (for -ह्°) D₅ रामराज्याभिषेचने, M₄ °ज्योपपत्तये (for the post half) —After line 2, D₅ ins 62* V₁ B₁ D₅ read lines 3–4 after 1 31 of App I (No 6) —(1 3) D₅ औ (for तौ) B₄ चाज्ञाय (for प्रति°) V₁ B₁ ₂ ₄ D₆ वचनात् (for °न) —(1 4) B₁ भूयश्चैव, D₅ M₄ त च(M₄ तच्च)प्रति- (for भूयश्चैव) Ñ₂ illeg , D₆ रूपस्यैवोपशृण्वता, L(ed) भूयस्येवोपशृण्वत (for the post half)]

5 ^{b}) D₅ ₆ M₄ अधि- (for अभि-) Ñ₂ V₁ B D₅ ₆ M₄ नराधिप (for जगत्पतिम्) —^{c}) Ñ₂ V₁ B D₆ सु(B₄ अ) प्रीतमनसौ प्रीत(B₃ *sec m* भूत्वा), D₅ M₄ सुप्रीतमनस प्रीता —^{d}) Ñ₂ V₁ B D₅ ₆ M₄ हृष्टयतौ पुनर्(D₆ सु न नृ) प —For 5, Ś₁ D₁₋₄ ₇ subst

64* एतमाज्ञाप्य तस्मै तौ गमिष्यन्त्यद्य वेश्मन ।
सुप्रीतमनसे राज्ञे यस्मिंश्चो हर्षयन्पुन ।

[(1 1) Ś₁ [अ]भिषे°, D₁ [अ]भ्यभिषेक; D₂ ₇ °षेचन. —After the prior half of 1 1, D₇ ins

64(A)* यस्मिंश्च यस्मिन्काले ।
क्षणेन तौ च तस्मै.

—(1 2) D₁ मानसे (for -स°) D₂ [ज]र्षयन् (for हर्षयन्) D₁ पुनि (for पुन) Ś₁ D₄ ₇ सुप्रीतायस्म राज्ञ यस्मिंश्च हर्षयन्पुन.]

—After 5, B₃ ins

65* हर्षयन्सर्वलोकाश्च अयोध्यापुरवासिन ।

6 ^{a}) Ś₁ Ñ₂ V₁ B D₅ ₆ M₄ आहूय (for द्युतिमान्). —^{b}) Ś₁ Ñ₂ V₁ B D₅ ₆ M₄ दशरथो (for वचनम्) —^{c}) D₄ राम (for राम) B₃ कृतार्थो (for °त्मा) —^{d}) D₁₋₄ ₇ क्षिप्रम् (for शीघ्रम्) —After 6, D₁₋₄ ₇ ins

66* समानयेह धर्मज्ञ सुमन्त्र प्रियदर्शनम् ।
राम मम मनो यावद्रमना प्रेक्ष्य त सुतम् ।

[(1 1) D₄ (after corr) धर्मज्ञ (for °ज्ञ) and (before corr) सुमत्र (for सुमन्त्र) —(1 2) D₄ ₇ रमते. D₂ ₄ ₇ प्रेक्षत (for प्रेक्ष्य त) D₄ सुत (for सुतम्)]

7 ^{a}) D₂ प्रतिज्ञाप्य —^{b}) D₃ शासन° (for °नात्). —^{c}) Ś₁ B (except B₃) D₆ [आ]निनायाय, V₁ निनायाय; D₁₋₄ ₇ [आ]नयामास (for °याचक्रे) Dm₁ G₂ ₃ M₁ राममामत्रयाचक्रे —^{d}) D₃ स रथेन (hy pm) (for रथेन). D₂ रथिन (for °ना) Ś₁ B₁ ₂ (before corr) Dg₁ D₆ वर —After 7, D₄ ₇ ins

67* प्रययौ रथमादाय ततस्तु रथिना वरम् ।

8 Cf lines 3–4 of 29* —^{a}) B₂ प्रीतास् (for अथ). Ś₁ D₆ समानीतास्, Ñ₂ B₃ M₂ °सीन, Dt₁ Dd₁ T₁ ₃ M₃ सहासीनास्, G₂ M₁ तदा°, Cg as in text (for समा°). D₁₋₄ ₇ आसीन चैव राजानम् —^{b}) T₂ ₃ G₁ ₂ M₁ तथा (for तदा) D₁₋₄ ₇ इ(D₂ ऐ)क्ष्वाकु राघूवर्धन —After 8^{ab}, G₂ M₁ ins

68* उपोपविष्टा सचिवा राजानश्च सनैगमा ।

[M₁ (*sec m.* as above) च नैगमा (for सने°)]

म्लेच्छाश्चार्याश्च ये चान्ये वनशैलान्तवासिनः ।
उपासांचक्रिरे सर्वे तं देवा इव वासवम् ॥ ९
तेषां मध्ये स राजर्षिर्मरुतामिव वासवः ।
प्रासादस्थो रथगतं ददर्शायान्तमात्मजम् ॥ १०
गन्धर्वराजप्रतिमं लोके विख्यातपौरुषम् ।
दीर्घबाहुं महासत्त्वं मत्तमातङ्गगामिनम् ॥ ११
चन्द्रकान्तानन रामममतीव प्रियदर्शनम् ।
रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणम् ॥ १२

घर्माभितप्ताः पर्जन्यं ह्लादयन्तमिव प्रजाः ।
न ततर्प समायान्तं पश्यमानो नराधिपः ॥ १३
अवतार्य सुमन्त्रस्तं राघवं स्यन्दनोत्तमात् ।
पितुः समीपं गच्छन्तं प्राञ्जलिः पृष्ठतोऽन्वगात् ॥ १४
स तं कैलासशृङ्गाभं प्रासादं नरपुंगवः ।
आरुरोह नृपं द्रष्टुं सह सूतेन राघवः ॥ १५
स प्राञ्जलिरभिप्रेत्य प्रणतः पितुरन्तिके ।
नाम स्वं श्रावयन्रामो ववन्दे चरणौ पितुः ॥ १६

G 2 2 18
B 2 3 33
L 2 5 18

—^{c}) V1 B (except B1) प्राच्योदीच्य-, D6 °दीश्यो (sic) (for °दीच्या) D6 प्रतीश्याश् (sic), G2 प्रदीच्याश् (sic) —^{d}) Ñ2 illeg

9 For 9^{ab}, cf 1 5 of 29* —^{a}) D5 मत्स्याश् (for म्लेच्छाश्) M3 आर्याश् (for चा°) T2 चान्या Ś1 Ñ2 V1 B D6 म्लेच्छाश्च यवनाश्चैव, D1-4 7 आर्या म्लेच्छाश्च मध्या (D7 °द्या)श्च —^{b}) Ś1 Ñ2 B शका, D6 शाका (for वन-) V1 शका शैलानुवासिका, D1-3 पार्वतीयास्तथैव च, D4 7 पा (D7 प)र्वतीयाश्च सर्वश, M4 वनपालातवासिन —After 9^{ab}, D5 ins

69* अध्वर्या म्लेच्छा मध्याश्च पार्वतीयास्तथैव च ।

—^{c}) D1 3 प्रीता, D2 4 7 वीरा (for सर्वे) —^{d}) Ñ2 V1 B M4 ते (for त) Dt1 वासव तथा (for इव वासवम्) D1-4 7 कुबेरमिव नैर्ऋता

10 ^{a}) T1 च मध्ये (for मध्ये स) D1-3 महाराजो (for स राजर्षिर्) D4 7 तथा मध्ये महाराजो —^{b}) D1-4 7 देवानाम् (for मरुताम्) —^{c}) Dg1 G2 प्रसादस्थो Dt1 दशरथो, Dd1 Dm1 D1-4 7 G3 रथस्थ त (for °गत) —^{d}) G2 दर्शयात ममात्मज (sic) —After 10, D1-4 7 ins

70* विद्योतमान प्रभया ददर्श सुतमात्मन ।

[=1 2 of 29(A)* D4 7 सुमहामति (for सुतमात्मन)]

11 ^{a}) D7 प्रतिभ (for °भ) —^{b}) B2 लोक, M4 देव- (for लोके) Ś1 B D1-7 M4 विश्रुत- (for विख्यात-) V1 लोके पौरुषसयुत —After 11, D1-4 7 ins

71* शैलक्षपितदन्ताना ग्रहीतार विषाणिनाम् ।
एक विख्यातवीर्याणामग्र्य सर्वधनुष्मताम् ।
सुवर्षेणैव पर्जन्य ह्लादयन्तमिव प्रजा ।
गुणैर्विद्योतयन्त च सहस्राशुमिवाशुभि ।

[(1 1) = 1 5 of 29(A)* D4 -कुठित- (for क्षपित-) D2 अहितार, D3 4 गृहीतार —(1 2) Cf 1 6 of 29(A)* D1 2 एको D3 व्याख्यात (for विख्यात-) D1 प्राग्र्य, D2 प्राज्ञ, D3 प्राग्र्य (for अग्र्य) —(1 3) Cf 13^{ab} D1 3 7 [इ]व (for [ए]व) —(1 4) Cf 1 8 of 29(A)* D4 7 विद्योतमान (for °यन्त)]

12 ^{d}) B3 हृष्ट- (for दृष्टि-) —After 12, D1-4 7 ins

72* हरि सुतीक्ष्णदशाग्र हन्तार हस्तिनामपि ।
दृष्टिणामिव सर्वेषा प्रधान युद्धकाङ्क्षिणाम् ।

[(1 1) D3 -दताग्र D4 7 इव (for अपि) —(1 2) D2 दृष्टाणाम् D1 2 अपि (for इव) D7 दृष्टियाणा च सर्वपा (sic) (for the prior half)]

13 D1-4 7 om 13^{ab} —^{a}) B3 घर्माभितप्त- —^{b}) B3 सीदयतम् (for ह्लाद°) —^{c}) Dg1 Dd1 ततर्प्य, D5 चातृप्यात् (sic) (for ततर्प) D1 2 5 तमायात (for समा°) Ś1 Ñ2 V1 B D4 6 7 नातृप्यत (Ś1 °च्च, D6 °श्च) तमायात, D2 नतपर्वत- मायात (sic), M4 तत्रापश्यस्तमा° —^{d}) Ś1 Ñ2 V1 B D6 ई(Ñ2 B3 वी)क्षमाणो (for पश्यमानो) D1-4 7 महीपति°, M3 नराधिप (for °धिप) M4 पश्यमाने नराधिपे —After 13, D1-4 7 ins

73* ददर्श द्युतिमान्राजा प्रजापतिरिवापर ।
राजा बभूव सहृष्टो दृष्ट्वायान्त तमात्मजम् ।

[1 1 =1 9 of 29* —(1 2) D3 महात्मज (for तमा°)]

14 ^{a}) D3 5 7 अवतीर्य D3 सुमन्त्र Ś1 Ñ2 V1 B1 3 D6 च, B2 Dt1 Dd1 D1 2 4 7 तु, B4 [s]द्य, D3 सु-, T1 damaged (for त) —^{b}) Dd1 Dm1 G2 3 M1 °व स्थदनात्तदा —^{c}) D1-4 7 सकाश (for समीप) M4 अनयत् (for गच्छन्त) —^{d}) D4 6 G3 प्राजलि D5 6 [s]न्वयात् (for °गात्) M4 त ददर्शात्मज नृप

15 ^{a}) B1 2 स तु, D5 तत (for स त) D1-4 7 तत कैलाससदृश —^{b}) Dm1 D1 5(before corr) 6 प्रयाद (sic) Dt1 रघुनदन, Dd1 (before corr) नरपुगव, D1-4 7 तमरिदम (for नरपुगव) —^{c}) D1-4 7 समासाद्य (for नृपं द्रष्टु) —^{d}) Ś1 D6 सहितस्तेन, Dt1 Ct सहसा तेन, T2 सूतेन सह (by transp)

16 ^{a}) D3 स- (for स) D1-4 7 अभिक्रम्य (for °प्रेत्य) —^{b}) D6 प्राणत Ś1 V1 B (except B3) D5 6 M4 अतिक D1-4 7 किंचित्प्रह्व समाहित (D3 °त) —^{c}) Ś1 Ñ2 V1 B (B3 by corr) Dt1 D5 6 M2 स(M2 वि)श्रावयन्, D1-4 7

तं दृष्ट्वा प्रणतं पार्श्वे कृताञ्जलिपुटं नृपः ।
गृह्याञ्जलौ समाकृष्य सस्वजे प्रियमात्मजम् ॥ १७
तस्मै चाभ्युद्यतं श्रीमान्मणिकाञ्चनभूषितम् ।
दिदेश राजा रुचिरं रामाय परमासनम् ॥ १८
तदासनवरं प्राप्य व्यदीपयत राघवः ।
स्वयेव प्रभया मेरुमुदये विमलो रविः ॥ १९
तेन विभ्राजिता तत्र सा सभाभिव्यरोचत ।
विमलग्रहनक्षत्रा शारदी द्यौरिवेन्दुना ॥ २०
तं पश्यमानो नृपतिस्तुतोष प्रियमात्मजम् ।
अलंकृतमिवात्मानमादर्शतलसंस्थितम् ॥ २१
स तं सस्मितमाभाष्य पुत्रं पुत्रवतां वरः ।
उवाचेदं वचो राजा देवेन्द्रमिव कश्यपः ॥ २२
ज्येष्ठायामसि मे पत्न्यां सदृश्यां सदृशः सुतः ।
उत्पन्नस्त्वं गुणश्रेष्ठो मम रामात्मजः प्रियः ॥ २३

सकीर्तयन्, G2 स्वय श्रावयन् (hypm), M4 चाश्रावयद् (for स्व श्रावयन्). —^{d}) D4 7 चरण —After 16, D1–4 7 ins

74* त पुत्रमिक्ष्वाकुवर सुनीत जयवर्धनम् ।
[D4 (*inf lin sec m*) विनीत (for सु°)]

17 ^{a}) D1–4 7 स (for त) D3 पृष्ट्वा (for दृष्ट्वा) B1 प्रणत, G2 °तौ (for °त) D4 प्राक्षु, D7 प्राक्षु (for पार्श्वे) —^{b}) D3 तत (for नृप) —^{c}) D2 [अं]गुलेा (for [अ]ञ्जलौ) Ś1 Ñ2 V1 B D6 गृहीत्वाजलिमाकृष्य —^{d}) D2 om सस्वजे Ś1 D6 स्वयम् (for प्रि°) —After 19, D1–4 7 ins

75* प्रत्यनन्दत्स धर्मात्मा स्व पुत्र पार्थदावृत ।
[D2 4 स्व- (for स्व) D3 7 पर्थदावृत]

18 ^{a}) Ś1 [अ]भ्युत्थित, Ñ2 [अ]प्युचित, V1 B2 Dg1 G1 2 M1–3 Cg [अ]भ्युदित, B1 [अ]त्युचित, B3 [अ]प्युपचित (hypm), B4 corrupt, D5 [अ]भ्यर्चित, D6 [अ]त्युच्चित, M4 [अ]भ्युचित, Ct as in text (for °थत). ❀ Cv तस्मै चाभ्युद्यतमिति पाठ । ❀ B1–3 D5 6 M4 श्रीमन, Dg1 Dt1 Dd1 G1 M1–3 सम्यट, Dm1 G2 3 सोम्य, T दिव्य (for श्रीमान्) ^{b}—) Ñ2 B1 3 D6 -भूषण —^{c}) Ś1 D6 रुचिर राजा (by transp), G2 M1 राजा सुचिर —^{d}) Dg1 काचन (for रामाय) Ś1 V1 B D6 [अ]नुपम-, T2 वरम् (for परम्) —For 18, D1–4 7 subst

76* तस्मे सुरूप रुचिर काञ्चन रत्नभूषितम् ।
राघवायासन राजा प्रदिदेश महात्मने ।
[(1 1) D3 सुरूप D7 ह चिर (for रुचिर) D2 मणि- (for रत्न) —(1 2) D2 प्रादिदेश D3 प्रद° (for प्रदि°)]

19 ^{a}) Ś1 Dt1 तथा, D5 स तद् (hypm) (for तद्) V1 आसनमनु- (for °वर) —^{b}) G2 partly damaged Ś1 D1–4 6 7 दीपयामास, B4 प्रदीपयत, M4 व्यदीप्यत स (for °पयत) —D4 om 19^{cd} —^{c}) Ñ2 स्वयमेव (hypm), V1 B4 Dg1 Dt1 Dd1 Dm1 D5 G2 M2 स्वयैव, D2 स्वय च (for स्वयेव) M4 युक्तम् (for मेरुम्) —^{d}) Ś1 B2 D3 6 विमले, D7 विपुलो, T3 निमतो (for विमलो) V1 उदये सवितेव हि

20 ^{a}) Ś1 V1 B Dg1 Dt1 Dd1 Dm1 D5 G1 M2 4 Cr g विभ्राजता, D6 स भ्राजता, Cr*p* as in text (for विभ्राजिता) D1–4 तेन विभ्राजमानेन —^{b}) Ś1 Dt1 Du1 Dm1 D4 6 7 G2 M1 [अ]पि, Ñ2 B3 Dg1 [अ]ति, D3 पै, M2 हि (for [अ]सि-) Ś1 Ñ2 B D2–4 6 7 M4 -व्यराजत, V1 D5 -व्यजायत (for -व्यरोचत) D1 सा सभा समराजिता —^{c}) Ś1 D6 विशाल- (for विमल-) —^{d}) Ñ2 illeg. D6 [अ]मुना (for [इ]न्दुना). D4 (gloss) शशिना —After 20, D1–4 7 ins

77* प्रासादवर्ये शुशुभे नभो भानुमता यथा ।
[D4 प्रासाद्वर्ये D3 शुभे शुभे (sic) (for शुशुभे)]

21 ^{a}) Ś1 Ñ2 V1 B D6 त स प(V1 B3 त सप, B3 (also) तसप)श्यक्षरपतिम्. —^{d}) Ś1 B D3 7 -तलमास्थितं, Dg1(m)°स्वस्थित (sic) (for °सस्थितम्) —For 21, D1–4 7 subst

78* तमवेक्षत सहर्षादिक्ष्वाकु प्रियमात्मजम् ।
आत्मानमिव चादर्शे युक्तरूपमिव श्रिया ।
[(1 1) D3 अवेक्षत (for अवे°) —(1 2) D2 युक्त (for युक्त)]

Thereafter cont

79* राजलक्षणसपन्न व्यूढोरस्क महाभुजम् ।
[D3 लक्षणा (for °ण)]

22 D1–4 7 om 22^{ab} —^{a}) B3 (before corr) सस्थितम् (sic), Dt1 सुस्थि°, T3 सस्मि° (for सस्मि°) —^{c}) D1–4 7 राजपु(D2 3 °जा पु)त्रमुवाचेद —^{d}) D1–4 7 महेन्द्रम् (for देवेन्द्रम्) Ś1 D6 भूमिप, B2 (before corr) Dg1 Dm1 S काश्यप (for क°) —After 22, D1 3 4 7 ins while D2 subst for 23^{ab}

80* व्यादिष्टो त्वमि मे ज्येष्ठ प्रसूत सदृश सुत ।
[D1 आदिष्टो]

23 ^{a}) T3 ज्येष्ठायम् (sic) B3 D3 4 - अपि (for असि) Ś1 पत्न्या तु, Dt1 मे पत्न्या (sic), D5 पत्न्या मे (by transp), D6 मे यत्त्वं —^{b}) B2 समत, D3 स सदृश (hypm) (for सदृश) —For 23^{ab}, D2 subst 80* —^{c}) Ñ2 partly illeg D4 तन्मत्तस् (for उत्पन्नस्) Ñ2 V1 B Dt1 Dd1 D1 2 5 7 M3 4 गुणज्येष्ठो, Dg1 T1 3 गुणै श्रेष्ठो, D3 गुरुज्येष्ठो, D4 गुणश्रेष्ठ, G1 गुणी ज्येष्ठो (for गुण-

Arya Research Team

त्वया यतः प्रजाश्चेमाः स्वगुणैरनुरञ्जिताः ।
तस्मात्त्वं पुष्ययोगेन यौवराज्यमवाप्नुहि ॥ २४
कामतस्त्वं प्रकृत्यैव विनीतो गुणवानसि ।
गुणवत्यपि तु स्नेहात्पुत्र वक्ष्यामि ते हितम् ॥ २५
भूयो विनयमास्थाय भव नित्यं जितेन्द्रियः ।
कामक्रोधसमुत्थानि त्यजेथा व्यसनानि च ॥ २६
परोक्षया वर्तमानो वृत्त्या प्रत्यक्षया तथा ।
अमात्यप्रभृतीः सर्वाः प्रकृतीश्चानुरञ्जय ॥ २७
तुष्टानुरक्तप्रकृतिर्यः पालयति मेदिनीम् ।
तस्य नन्दन्ति मित्राणि लब्ध्वामृतमिवामराः ।
तस्मात्पुत्र त्वमात्मानं नियम्यैवं समाचर ॥ २८

G 2. 2 33
B 2 3 46
L 2 5. 33

श्रेष्ठो) Ś1 D6 उत्पन्न सद्गुणै पूज्यो —^{d}) V1 B4 चात्मात्मज, B2 D5 ज्येष्ठोत्मज (for रामा°) D1 3 4 7 रामनामात्मज प्रिय, D2 रामो मे चात्मज प्रिय, M4 रामो रामात्मन प्रिय.

24 Dg1 reads 24 in marg —^{a}) V1 D1–5 7 त्वया तात, B3 (marg) तवायत्ता, Dg1 M3 यतस्तया, Dm1 G3 त्वया यथा, D6 त्वय्यायत्ता, K(ed) यतस्त्वया (by transp) (for त्वया यत) —^{b}) Dg1 M3 अभि- (for अनु) Dm1 G2 3 M1 स्वगुणेनाभिरजिता —Ñ2 illeg for 24^{cd} —^{c}) D1 पुण्य- (for पुष्य-) B3 -योगे तु (for -योगेन) —^{d}) D1–4 7 अवाप्स्यसि, M4 इहार्हसि (for अवाप्नुहि)

25 D1–4 7 om 25 —^{a}) Ś1 D6 कार्यं च ते, Ñ2 illeg, V1 B2(marg *sec m*) 3 राम त्व तु(B3 च), B1 3 (also) D5 काम च त्व, B2 4 M4 राम त्व च (for कामतस्त्व) —^{b}) Dt1 निर्णीतो (for विनीतो) V1 B1 2 4 Dd1 अपि, Dt1 इति, M4 च ह (for असि) —^{c}) G3 न (for तु) Ś1 D6 गुणवत्त्वात्पितृस्नेहात्, Ñ2 illeg, V1 B °त्वे पितृस्ने(B3 °त्त्वेपि च स्ने)हात्, G (ed) गुणवत्त्वयि च स्नेहात्

26 ^{a}) Cr भूयोविनय as a compound —^{b}) B3 (before corr as in text)भवन्, Dd1 Dm1 G2 3 भवान् (for भव) V1 यतेन्द्रिय (for जितेन्द्रिय) —For 26^{ab}, D1–4 7 subst

81* जितेन्द्रिय प्रकृत्यासि भूयस्त्वानि वशे कुरु ।
[D2 वशीकुरु]

—^{c}) Dm1 (before corr) कामे (for काम-) D1–4 7 -समुत्थ च (for समुत्थानि) —^{d}) Ś1 Ñ2 D6 त्यज त्व, V1 त्यजाशु, B2 त्यजेत्स्व, B3 °च, B4 त्यक्त्वाशु, Dd1 (by corr) त्यजेय (for °था) B2 (marg also) व्यवसायानि च त्यज, D1–4 7 त्यक्तव्य व्यसन(D3 व्यजन, D4 7 सतत) त्वया

27 ^{ab}) D3 धृत्या (for वृत्त्या) Dd1 तथा (for तथा) Ś1 Ñ2 V1 B D6 M4 परोक्षयानिश(Ś1 °पि स, D6 °भिस) वुद्धया राम(B4 °म) प्रत्यक्षया तथा —After 27^{ab}, Ś1 Ñ2 V1 B D5 6 M4 ins

82* परात्मप्रकृति दृष्ट्वा परिपाल्या प्रजास्त्वया ।
तत्परो निरहकारो भूत्वा राम गुणान्वित ।
तत पालय पुत्रेमा प्रजा पुत्रानिवौरसान् ।
योधानमात्यान्हस्त्यश्व कोष चावेक्ष्य यत्नवान् ।
[(1 1) Ś1 Ñ2 V1 D6 परमा, B1 3 (marg) परा च (for परात्म-) D5 -प्रकृती[तीर्] (for °तिं) Ñ2 V1 B3 त्वया प्रजा (by transp), D5 प्रजास्तथा —(1 2) Ś1 D6 निर्ममो, B3 (also as above) सत्पथो, G(ed) मत्परो (for तत्परो) D6 M4 निरभिमानो (for निरहकारो) —(1 3) B1 erroneously repeats प्रजा —(1 4) Ś1 V1 D6 [अ]श्वान्, D6 [अ]श्व- (for [अ]श्व) V1 योधान्हयान्स्तिनश्च, M4 यौधानथाश्वान्हस्त्यश्वान् (for the prior half) Ś1 चावीक्ष्य, Ñ2 illeg, V1 परे[रे]क्ष्य, B4 च वीक्ष्य (for चावेक्ष्य) B1 (*inf lin*) यत्नत (for °वान्)]

B4 cont

83* देशान्पौरजनास्तात सामन्ताननुगास्तथा ।

D5 M4 cont after 82^1

84* दुर्गान्पौराञ्जनपदान्सामन्तनगराणि च ।
[M4 दुर्ग (for दुर्गान्)]

—^{c}) T3 अमात्य D1–4 7 -प्रमुखा (for प्रभृती) G2 M1 चैव (for सर्वा) —^{d}) Dt1 प्रजाश्चैव (for प्रकृतीश्च) D1 अनुरजय (for चा°) —For 27^{cd}, Ś1 Ñ2 V1 B D5 6 M4 subst

85* तथा मित्राणि मध्यस्थानुदासीनाश्च रञ्जय ।
[B1 2 D5 मित्राण्य(D5 °न)मित्रान्मध्यस्थान्, B4 मित्रामित्राणि म° (for the prior half) B1(before corr) 2 4 राघव, D6 रजयन् Ś1 Ñ2 D6 मित्राण्यप्युप(D6 °प्यनु)रजय, V1 दासीदासाश्च राघव, B3 (also as above) अमित्राश्चानुरजयन् (for the post half)]

—After 27, Dg1 Dt1 Dd1 Dm1 D1–4 7 T G M1–3 ins

86* कोष्ठागारायुधागारं कृत्वा सनिचयान्बहून् ।
[D1–4 7 कोशा(D3 काष्ठा)गारायुधागारे, T2 G M2 गोष्ठा° (for the prior half) D1 2 कृत्वा(D2 त्व च) सन्निधयाधिकं, D3 कृत्वा मत्रैर्व्ययाधिके, D4 7 कृत्वा सपच्चयाधिके (for the post half)]

28 ^{a}) V1 M4 दृष्ट्वानु-, V1 (marg) दुष्टानु-, Dg1 Dt1 Dd1 Dm1 G3 Ct इष्टानु, Cg as in text (for तुष्टानु-) V1 T2 G1 3 -रक्त (for -रक्त) Dm1 T1 2 G3 -प्रकृतीर् (for °तिर्) D1–3 तुष्टपुष्टभृतप्रेष्य, D4 7 तुष्टपुष्टभृता प्रेष्या —^{b}) D1–4 7 पृथिवीमनुपालय(D3 °रजय) —^{c}) B1 (by corr) [आ]नदति (for नन्दन्ति) D1–4 7 एव मित्राणि नदतु —^{d}) B1 (marg) लब्धामतम्, D4 (*sec m* as in

तच्छ्रुत्वा सुहृदस्तस्य रामस्य प्रियकारिणः ।
त्वरिताः शीघ्रमभ्येत्य कौसल्यायै न्यवेदयन् ॥ २९
सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ।
व्यादिदेश प्रियाख्येभ्यः कौसल्या प्रमदोत्तमा ॥ ३०
अथाभिवाद्य राजानं रथमारुह्य राघवः ।
ययौ स्वं द्युतिमद्वेश्म जनौघैः प्रतिपूजितः ॥ ३१
ते चापि पौरा नृपतेर्वचस्-
चुत्वा तदा लाभमिवेष्टमाप्य ।
नरेन्द्रमामन्त्र्य गृहाणि गत्वा
देवान्समानर्चुरतीव हृष्टाः ॥ ३२

इति श्रीरामायणे अयोध्याकाण्डे तृतीयः सर्गः ॥ ३ ॥

---

text) °भूतम् B4 M1 (*inf lin sec m* as in text) [अ]परा (for [अ]मरा) —D1-4 7 om 28^{cf} T1 illeg. for 28^{c}-29^{b} —^{c}) Dm1 (before corr) तया (for त्वम्) Dg1 T2 3 G1 M3 तस्मात्त्वमपि चात्मान —^{f}) B3 (also as in text) निशम्य (for नियम्य) V1 B4 T2 [इ]व (sic), M2 [ए]व (for [ए]व) B3 (also as in text) सदाचर (for समा°)

29 T1 illeg for 29^{ab} (cf v l 28) —^{a}) G2 सौहृदस् —^{b}) Dt1 -काक्षिण (for -कारिण) —For 29^{ab}, Ś1 Ñ2 V1 B D1-7 M4 subst

87* इति राज्ञो वच श्रुत्वा नरा प्रियनिवेदिन ।

[D5 (before corr as above) रामो (for राज्ञो) —D5 om (hapl) from the post half up to the prior half of l 1 of 88* D3 जना, M4 प्रिय (for नरा) Ñ2 V1 -निवेदन, B4 -वादिन (for -निवेदिन)]

—^{c}) D1 3 त्वरित, D2 चरित (before corr °ते), D1 7 त्वरया (for त्वरिता) Dt1 आगत्य, D6 अत्येत्य (for अभ्येत्य) —^{d}) V1 B Dm1 D1-4 7 कौश (Dm1 °शि)ल्यायै, M3 कौसल्याया (for °ल्यायै) ☞ The spelling of कौसल्या in different MSS is not uniform, hence its variants are ignored hereafter B1 D2 निवेदयन

30 D5 om up to the prior half of l 1 of 88* (cf v l 29) —^{a}) M2 damaged Dd1 Dm1 G2 3 M1 हिरण्यानि (for हिरण्य च) B2 3 D3 G1 गाश्चैव, B4 वासश्च, D6 गोश्चैव (for गा°) —^{b}) B1 धनानि (for रत्नानि) —^{c}) V1 Dd1 D1-4 7 आदिदेश (for व्या°) Ś1 तदा तेभ्य, D2 प्रियाभ्येत्य, D6 ततस्तेभ्य (for प्रियाख्येभ्य) —After 30, B2 D1-5 (after श्रुत्वा in 87* owing to om) 7 ins

88* रामोऽपि तद्वच श्रुत्वा राज्ञो ह्यमिततेजस ।
प्रहृष्टवदनो भूत्वा तथेत्याह नराधिपम् ।
राजापि गुरुणाज्ञप्त सानुजोऽय विसृज्यताम् ।
राममुद्दिश्य राजा वै गम्यतामित्यनोदयत् ।
अनुज्ञातस्तु पित्रा वै गमनायोपचक्रमे । [5]

[D5 om the prior half of l 1 —(l 1) D1 वचन (for तद्वच) —D6 transp lines 3 and 4 —(l. 3) D5 रामो, D7 राजा (for राज्ञो) B2 [अ]दिष्ट (for [आ]ज्ञप्त) B2 सानुगोय, D4 7 सानुजाप्य (for सानुजोऽय) D3 विसर्ज्य, D4 7 विसर्जये त —(l 4) D5 [अ]थ (for वै) B2 [अ]नोदयत, D1 [अ]नोदयत, D2 7 [अ]नोदयत् (sic), D5 नोदयत (for [अ]नोदयत) —(l 5) B2 तथा पित्रा, D5 च पित्रा च (for तु पित्रा वै)]

31 ^{a}) V1 G1 3 तथा, D2 यथा (for अथ) Dg1 [अ]भिवाद्य (for °वाद्य) —^{c}) D2 M3 स्व, M4 स (for स्व) Ś1 Ñ2 V1 B D1 5 7 T2 युक्तिमा (D1 T2 °द्य)न, T2 M2 3 द्युतिम (T2 °द्य)द् (sic) (for द्युतिमद्) —^{d}) B1 4 D4 जनौघै (sic) Ś1 Ñ2 V1 B1 2 (marg) 4 D6 पति, D1 2 अभि, D3 अपि, D1 - अथ, G2 परि- (for प्रति) D1-4 - सहृत, D5 (before corr) पूजक (for -पूजित), G (ed) परिवारित

32 ^{a}) Ñ2 अथो वच, B1 D5 वचस्तदा (for वचस्त्व) —^{b}) Ś1 Ñ2 B1 2 4 D6 तत्तो, V1 B3 महा, T1 3 तथा (for तदा) Ś1 D6 धनंतम् (for इष्टेष्टम) Ś1 B4 D6 आपु, Dg1 Dt1 आशु, Dd1 Dm1 आसन (for आप्त) M4 श्रुत्वा लाभे मन्यमानो यथा वै —^{c}) Ś1 B4 D6 गृहाश्च (for गृहाणि) —^{d}) M2 partly damaged D6 समानर्शुर् (sic) (for °र्चुर्) B3 (marg) धनीव भक्त्या, Dg1 Dt1 Dd1 Dm1 S (M2 damaged) अति (Dg1 Dt1 M3 °भि)प्रहृष्टा (for अतीव हृष्टा) D5 देवान्समभ्यर्चुरभीष्टहृष्टा B1 (gloss) हृष्टा भवतनिन्दिता बभूवु (sic) —For 32, D1-4 - subst

89* ते चापि सर्वे समवाप्य काम
नरा नरेन्द्रेण कृतप्रहर्षा ।
नरेन्द्रमामन्त्र्य गृहाणि सत्वरा
प्रपेदिरे राघवराज्यहर्षिता ।

[(l 1) D2 राम (for काम) —(l 2) D3 नरा नरेन्द्राल्लसप्रहर्षा]

Colophon —*Sarga name* Ś1 Ñ2 V1 B D5 6 रामाभिषेकव्यवसाय, D1-4 दशरथानुशासन, D7 रामानुशासन —*Sarga no* (figures, words or both) Ñ2 B2 3 1, V1 2, D1 58, D2 4 7 5, D3 49, D5 7

४

गतेष्वथ नृपो भूयः पौरेषु सह मन्त्रिभिः ।
मन्त्रयित्वा ततश्चक्रे निश्चयज्ञः स निश्चयम् ॥ १
श्व एव पुष्यो भविता श्रोऽभिषेच्येत मे सुतः ।
रामो राजीवताम्राक्षो यौवराज्य इति प्रभुः ॥ २
अथान्तर्गृहमाविश्य राजा दशरथस्तदा ।
सूतमाज्ञापयामास रामं पुनरिहानय ॥ ३
प्रतिगृह्य स तद्वाक्यं सूतः पुनरुपाययौ ।
रामस्य भवनं शीघ्रं राममानयितुं पुनः ॥ ४
द्वाःस्थैरावेदितं तस्य रामायागमनं पुनः ।
श्रुत्वैव चापि रामस्तं प्राप्तं शङ्कान्वितोऽभवत् ॥ ५
प्रवेश्य चैनं त्वरितं रामो वचनमब्रवीत् ।
यदागमनकृत्यं ते भूयस्तद्ब्रूह्यशेषतः ॥ ६
तमुवाच ततः सूतो राजा त्वां द्रष्टुमिच्छति ।
श्रुत्वा प्रमाणमत्र त्वं गमनायेतराय वा ॥ ७
इति सूतवचः श्रुत्वा रामोऽथ त्वरयान्वितः ।
प्रययौ राजभवनं पुनर्द्रष्टुं नरेश्वरम् ॥ ८

G 2 3 8
B 2 4 8
L 2 6 7

4

☞ Ñ1 missing for Sarga 4 (cf v l 2 1 1) D6 begins with 3.

1 a) D1 गतेष्वेव, D3 °ष्वेव, D4 °ष्वथो, D5 °ष्वपि (for गतेष्वथ) V1 नृपैर् (for नृपो) —b) V1 पौरैश्च T2 नृप (for सह) D2 मन्त्रिषु (for मन्त्रिभि) —c) Dg1 reads मन्त्र in marg —d) V1 सनातन, B3 (also) Dg1 सुनि° (for स निश्चयम्)

2 a) D1 5 7 M4 स (for श्व) V1 सेच्यो, D4 (after corr *sec m* as in text) पुष्ये (for पुष्यो) D3 भविति (sic) (for भविता) —b) G M3 [s]भिषिच्यत (for sभिषेच्येत) Ś1 V1 D6 पुत्रो मे श्रो(Ś1 सो)भिषि(D6 °षे)च्यता, Ñ2 B सुतो मे श्रोभिषिच्यता, Dg1 श्रोभिषिचत मे सुत, Dt1 श्रोभिषेच्यस्तु मे सुत, Dd1 Dm1 श्रोभिषिच्येत मे सुत, D1–5 7 श्रोभिषे(D1 2 5 °षि)च्य सुतो मया(D5 मम), M4 श्रोभिषेच्यस्तु राघव —c) Dt1 T2 °पत्राक्षो, D4 राजा च ताम्राक्षो (for राजीवताम्राक्षो) Dg1 राम राजीवताम्राक्ष —d) V1 यौवराज्यम्, Dt1 Ct युवराज B3 4 इव (for इति) D4 7 श्रुति (for प्रभु) —After 2, D1–4 7 ins

90* रामे निवेदित सर्वं प्रणयाद्दर्पितेन च ।

3 a) V1 तथा (for अथ) B3 (also) [अं]तगृहम्. D1–4 7 आसाद्य (for आविश्य) —b) B4 तथा (for तदा) —c) T G3 M3 Cr m g t आमन्त्रयामास (for आज्ञापयामास) —d) D1–4 7 रामस्यानयन(D4 7 °ने) पुन

4 D4 om 4 —a) V1 महद्, Dg1 Dt1 Dd1 Dm1 D1–3 7 T G2 3 M1 2 तु तद् (for स तद्) —b) Ś1 D6 अथो ययौ, T3 M3 4 द्वहा° (for उपा°) —c) D1 भुवन B2 दिव्य (for शीघ्र) —d) D1–3 7 तमेव (for राममू)

5 G3 om (hapl) 5ab —a) B2 reads 5ab also in marg as in B4 Ś1 Ñ2 B1–3 D6 तेन च, V1 द्वा स्थेन, Cm g as in text (for द्वा स्थैर्) D1 3 4 7 M4 तत्र, D2 सर्वं (for तस्य) —b) Ś1 Ñ2 B1–3 D6 रामस्य, B4 D5 सूतस्य (for रामाय) Ñ2 B3 Dd1 D6 गमन (for [आ]गमन) D1–4 7 राघवाय महात्मने —B1 3 D6 om 5c–7b, Ñ2 om 5c–6 and D1–4 7 om 5cd B2 reads 5c–7b in marg Ś1 reads 5cd in marg —c) Ś1 तु (for त) G2 M1 चाभिरामस्त B2 श्रुत्वापि चैव त प्राप्त —d) Ś1 G3 प्राप्त, Ñ2 B1–3 D1–4 6 7 राम, V1 D5 प्राप्त- (for प्राप्त) Ś1 [s]ब्रवीत्

6 Ñ2 B1 3 D6 om, B2 reads in marg 6 (cf v l 5) Ś1 om 6ab —ab) B4 प्रविश्य M4 चैव V1 B2 4 Dg1 Dt1 T2 M4 त्वरितो (for त्वरित) D1–4 7 प्रवेशयामास तदा वचन चे(D2 इ)दमब्रवीत् —Ś1 reads 6c–7b in marg —c) D1–4 7 किम् (for यद्) B4 -हृत्यं, Dd1 Dm1 G2 M1 -कार्यं (for -कृत्य) —d) M4 त (for तद्) D1–4 7 तद्भवान्वक्तुमर्हसि(D7 °ति) —After 6, V1 ins

91* तेन चावेदितं तस्य रामस्यागमन तत ।

7 V1 B1 3 D6 om 7ab (except V1 cf v l 5) Ś1 B2 read 7ab in marg (cf v l 6 and 5) —ab) D3 अर्हति (for इच्छति) Ñ2 B2 (m) द्रष्टुमिच्छति राजा त्वा शीघ्रमागतुमर्हसि —B4 D1–4 7 om 7cd —c) B3 (m also as in text) Dt1 Dd1 Dm1 G M1 2 तत्र, Cg t as in text (for अत्र) —d) Dg1 Dd1 च (for वा) ❀ Cg गमनाय इतराय आगमनाय च। ❀ Ś1 Ñ2 V1 B1–3 D6 I2 G3 गमनायेति राघव(Ś1 D6 °च), D5 (after corr as in text) °यैव राघव

8 a) V1 इति दूतवच, D1 तस्य तद्वचन, D2–4 7 सूतस्य वचन (for इति सूतवच) —b) Ś1 Ñ2 V1 B1–3 Dt1 D4 6 7 [s]पि (for sथ) B1 reads त्वरयान्वित in marg (also द्वाक्य • प्रीतिवर्धन • मालोक्य रामोपि इत्युक्त्वा) B4 (marg also as in Ś1) रामो वचनमब्रवीत् (= 6b), D3 + • रयान्वित —c) Dm1 D1 -भुवन —d) Ñ2 illeg (for द्रष्टु) Ś1 Ñ2 B D6 नरपैभ, V1 D5 M4 नराधिप (for नरेश्वरम्)

Arya Research Team

तं श्रुत्वा समनुप्राप्तं रामं दशरथो नृपः ।
प्रवेशयामास गृहं विवक्षुः प्रियमुत्तमम् ॥ ९
प्रविशन्नेव च श्रीमान्राघवो भवनं पितुः ।
ददर्श पितरं दूरात्प्रणिपत्य कृताञ्जलिः ॥ १०
प्रणमन्तं समुत्थाप्य तं परिष्वज्य भूमिपः ।
प्रदिश्य चास्मै रुचिरमासनं पुनरब्रवीत् ॥ ११
राम वृद्धोऽस्मि दीर्घायुर्भुक्ता भोगा मयेप्सिताः ।
अन्नवद्भिः क्रतुशतैस्तथेष्टं भूरिदक्षिणैः ॥ १२
जातमिष्टमपत्यं मे त्वमद्यानुपमं भुवि ।
दत्तमिष्टमधीतं च मया पुरुषसत्तम ॥ १३
अनुभूतानि चेष्टानि मया वीर सुखानि च ।
देवर्षिपितृविप्राणामनृणोऽस्मि तथात्मनः ॥ १४
न किंचिन्मम कर्तव्यं तवान्यत्राभिषेचनात् ।
अतो यत्त्वामहं ब्रूयां तन्मे त्वं कर्तुमर्हसि ॥ १५
अद्य प्रकृतयः सर्वास्त्वामिच्छन्ति नराधिपम् ।
अतस्त्वां युवराजानमभिषेक्ष्यामि पुत्रक ॥ १६
अपि चाद्याशुभान्राम स्वप्नान्पश्यामि दारुणान् ।
सनिर्घाता महोल्काश्च पतन्तीह महास्वनाः ॥ १७

---

9 [a]) S1 Ñ2 V1 B D6 स, Dm1 G1 तच्च (for त) D1 3 4 7 श्रुत्वा तु, D2 श्रुत्वाथ (for त श्रुत्वा) —[b]) D3 सुत (for राम) —[c]) Dg1 सुत (for गृह) Ś1 Ñ2 V1 B D1–4 6 7 तूर्णं प्र(B1 प्रा)वेशयामास —[d]) D1–3 7 विवक्षुरभयोर्हित

10 [a]) Ñ2 illeg for two letters after प्रवि D2 3 इव (for एव) V1 om, D4 7 स (for च) —[b]) Ś1 राघव D1–4 7 रघुनंदन (for भवन पितु) —[c–d]) D1–4 7 स तत्र पितर दृष्ट्वा बभूवाथ कृताञ्जलि

11 [a]) Ñ2 V1 M3 प्रणमान(Ñ2 °न), B M4 प्रणामान (sic) (for प्रणमन्त) Ñ2 V1 B Dt1 M4 तमुत्थाप्य, Dm1 G3 परिष्वज्य, Ct as in text (for समुत्थाप्य) D1–4 7 तत प्रणाम कुर्वाण, D5 प्रणतमथोत्थाप्य (subm) —[b]) Dg1 Dt1 Dd1 D1 4 7 स-, D2 3 स, Ct as in text (for त) G2 M1 भूपति V1 परिष्वज्य च पीडित, Dm1 G3 त समुत्थाप्य भूपति —[c]) B1 आदिश्य, Dd1 M2 प्रविश्य (for प्रदिश्य) D1–4 7 आदिदेशासन तस्मै(D3 चैव), G1 प्रदिश्य रुचिर तस्मै —[d]) D1–4 7 वाक्य चेदमुवाच ह

12 [a]) Ñ2 illeg for first four letters D1–4 7 तात (for राम) B4 वृद्धाक्ष —[b]) Ñ2 V1 B1–3 Dt1 Dd1 Dm1 G3 यथा (for मया) Ś1 B4 D6 भुक्त्वा भोगान्यथेप्सितान्, D1–4 7 व्रतानि चरितानि मे —[c–d]) Ñ2 V1 B1 3 (marg also as in text) अन्नवद्भि, B2 (marg also अन्न°)अश्व°, B4 मन्त्र°, Cg t as in text (for अन्नवद्भि) V1 B4 Dg1 Dt1 Dd1 Dm1 G3 यथा, B2 M4 मया (for तथा) D1–4 7 सुसमृद्धैर्मया चे(D7 चे)ष्टं क्रतुभिश्चाप्त(D7 °श्च प्र)दक्षिणै

13 [a]) Ś1 D6 प्राप्तम् (for जातम्) G1 2 M1 2 जातोसीष्टम् (for जातमिष्टम्) D3 4 7 च (for मे) D1 2 जातानीष्टान्यपत्यानि —[b]) Ś1 D6 मया च, Ñ2 V1 B त्वमपि (for त्वमद्य) Dd1 Dm1 G3 [अ]नुपमो D1–4 7 पालित (D3 °वन) तदनत(D1 °नुत्त)र —D1–4 7 om 13°–14[b] —[c]) V1 अपत्य (for अधीत) M3 इ धीत

14 D1–4 7 om 14[a–b] (cf v l 13) —[a]) Ś1 D6 च तथा, V1 [ए]व तथा, B1 4 सर्वाणि, B3 (also with hiatus) इष्टानि (for चेष्टानि) —[b]) Dt1 D5 7 M2 4 [अ]पि, D6 वे (for च) Ś1 V1 B3 D6 वीर राज्यसु°, Ñ2 वीर (illeg) सु°, B1 4 चिर राज्यसु°, B2 मया गनसु° —[c–d]) B1 देवर्द्विजर्षि- (hypm) (for देवर्षि-) Ñ2 B1 M4 -भूतानाम्, B3 -पुत्राणान् (sic) (for -विप्राणाम्) V1 पुन, G1 2 [आ]त्मज (G1 °ज) (for [आ]त्मन) D1–4 7 अनृणोस्मि पितृणा च देवताना च राघव

15 [a]) D2 नो (for न) V1 किंचिन्मम न (by transp) D1–4 7 अकृत मेस्ति (for मम कर्तव्य) —[b]) Ś1 [अ]भिषेचन —[c]) Ś1 Ñ2 V1 B D6 अ(V1 त)स्त्वा यदह ब्रूया (by transp), D4 7 अतो यथाह ते ब्रूया, M4 अतोह त्वामह ब्रूया —[d]) D4 7 तथा (for तन्मे)

16 D1–5 7 om 16 —[a]) S1 (as in text also) D6 अथ (for अद्य) —[b]) Ñ2 reads मिच्छति नराधिप in marg —[c]) Ñ2 illeg, M4 त्वा (for त्वा) Ś1 V1 B D6 यौ(Ś1 यु)वराज्येह (for युवराजानम्)

17 D1–4 7 transp 17 and 18 —[a–b]) Dg1 D5 G1 M2–4 [अ]पि (for [अ]द्य) Dd1 Dm1 G3 transp. राम and स्वप्नान् G2 M1 स्वप्ने (for राम) Ś1 Ñ2 V1 B D6 राज्यते च तथा(Ś1 D6 सदा, V1 यथा)राम, D1–4 7 अपि च ह्य(D4 7 चाप्य)नभिप्रेतान् (for [a]) G1 M2 3 स्वप्ने, G2 M1 राम (for स्वप्नान्) V1 Dt1 राघव, T1 दा ग्णान् —[c]) B3 D2 सनिर्घात- Dg1 G1 M2 3 Ck डिवोल्का, Dt1 Dd1 G2 M1 Ct डिवोल्काश्, D1 2 महोल्काश्, T M4 महोल्का (for महोल्काश्) —[d]) Ñ2 V1 B1–3 Dm1 T2 G2 3 M1 पतिताश्च (V1 B1 2 G2 3 M1 °ता हि, T2 °ता सु-), B4 Dt1 Dd1 D5 पतति हि(Dd1 च), Dg1 T1 3 पततीह, G1 M2–4 पतितेह (for पतन्तीह) B3 महास्वरा, Dg1 T G1 M2–4 महास्वना. Ś1 D1–4 6 7 पतति खर(D2 °)नि (D4 7 °नि)स्वना. —After 17, D1–4 7 ins, D5 ins after 18

92* उपविष्टो विशाखासु रोहिणीञ्चसितो ग्रह ।
निवान्ति वाता परुषा सगैला भूश्च कम्पते ।

Arya Research Team

अवष्टब्धं च मे राम नक्षत्रं दारुणैर्ग्रहैः ।
आवेदयन्ति दैवज्ञाः सूर्याङ्गारकराहुभिः ॥ १८
प्रायेण हि निमित्तानामीदृशानां समुद्भवे ।
राजा वा मृत्युमाप्नोति घोरां वापदमृच्छति ॥ १९
तद्यावदेव मे चेतो न विमुह्यति राघव ।
तावदेवाभिषिञ्चस्व चला हि प्राणिनां मतिः ॥ २०
अद्य चन्द्रोऽभ्युपगतः पुष्यात्पूर्वं पुनर्वसुम् ।
श्वः पुष्ययोगं नियतं वक्ष्यन्ते दैवचिन्तकाः ॥ २१
तत्र पुष्येऽभिषिञ्चस्व मनस्त्वरयतीव माम् ।
श्वस्त्वाहमभिषेक्ष्यामि यौवराज्ये परंतप ॥ २२
तस्माच्चयाद्य व्रतिना निशेयं नियतात्मना ।
सह वध्वोपवस्तव्या दर्भप्रस्तरशायिना ॥ २३
सुहृदश्चाप्रमत्तास्त्वां रक्षन्त्वद्य समन्ततः ।
भवन्ति बहुविघ्नानि कार्याण्येवंविधानि हि ॥ २४

G 2 3 24
B 2 4 24
L 2 6 23

[(1 1) D1 3 5 उपसृष्टो(D3 °ष्टे), D2 °ह्यष्टो D1 विशाखाभ्या, D2 विशेषाया, D5 विशाखाया (for विशाखासु) D2 3 रोहिणीष्वा (D3 °ष्व)सि(D2 शी)तो ग्रह , D4 7 रोहिणी ग्रसते ग्रह —After line 1, D3 ins

92(A)* रोहिण्यवस्थितो राहुर्विशाखासु पुनर्यथो ।
एव वदन्ति दैवज्ञा योग राजविनाशकम् ।

—(1 2) D1 2 विवाति, D4 7 प्रवाति D5 वाति वाताश्च (for निवान्ति वाता) D2 परुषा वाता (by transp)]

18 D1-4 7 transp 17 and 18 —^{a}) Ś1 Ñ2 V1 B (B3 also उपसृष्टब्ध) D1-7 M4 उपसृ(D7 °मृ)ष्ट, Dg1 Dt1 Dd1 अवष्टब्ध (sic), Cm g t as in text Ś1 हि (for च) D3 om मे (subm) —^{b}) Ś1 D6 नक्षत्रैर् D1-5 7 पीडित(D2 °) (for दारुणैर्) —^{c}) D1 2 वै तज्ज्ञा , D5 कालज्ञा , D6 दे° (for दैवज्ञा) —^{d}) D1-3 5 शुक्रागार-शनैश्चरै , D4 7 जन्मस्थो मे शनैश्चर —After 18, D5 ins 92*.

19 B3 reads 19 in marg (*sec m*) —^{a}) S1 Ñ2 V1 B D6 प्रायशो (for प्रायेण) Dg1 Dt1 G1 M1 3 4 Ck च (for हि) B1 2 D5 [अ]निमित्तानाम् , D2 निमित्तानि —^{b}) D3 समुद्भव , T3 समुद्यमे, M3 समुद्भवै D2 ईदृशानि भवति हि —^{cd}) Dg1 Dt1 T G1 M2 3 हि, D5 च (for वा) Dd1 Dm1 G2 3 M1 मृत्युमवाप्नोति (for वा मृत्युमा°) Ś1 Ñ2 V1 B1 4 D6 राष्ट्र , B3 M4 राज्य (for घोरा) Dt1 Dm1 D5 T2 च (for वा) B1 4 नाशम् (for [आ]पदम्) G3 घोरामापदम्, M2 °वातपम् (sic) (for घोरा वापदम्) V1 B1 3 D5 इच्छति (for ऋच्छति) Ś1 D6 राज्य वा नैवम्(Ś1 °व ऋ)च्छति, B2 (m also राष्ट्र वापदमर्हति) राज्याद्वा भ्रश्यते पुन (for ^{d}) D1-4 7 राज्याद्वा भ्रश्यते राजा मृत्यु वा(D2 चा) पि हि गच्छति(D3 °पि नियच्छति [sic], D4 7 °प्यभिगच्छति)

20 ^{ab}) Ś1 D6 चित्त मे, Ñ2 V1 B G2 M1 चे(G2) तो मे (by transp), D5 मे चित्त Dg1 T G1 2 Cg k विमुचति, Cm t as in text D1-4 7 यावच्च मम धर्मज्ञ चेतो न परिमुह्यति(D4 °मुच्यते, D7 °मुह्यते) —^{c}) Ś1 V1 B2-4 D1-3 5 6 [अ]भिषिच्यस्व, Ñ2 G2 M1 [अ]भिषिच्यस्व, B1 [अ]भिषिक्ष्ये त्वा, Dg1 [अ]भिषिच्यश्च, D4 7 [अ]भिगच्छस्व, Cm t as in text —^{d}) Ś1 V1 B1 D2 5 6 गति , D1 3 4 7 स्थिति (for मति)

21 ^{a}) D3 4 7 अथ (for अद्य) B1 G1 [ऽ]प्युपगत , Dg1 D3 ह्युपगत , G1 [ऽ]भ्युपनत (for ऽभ्युपगत) —^{b}) B4 D3 G1 पुनर्वसु , T1 G3 पुनर्वसू D1 2 4 7 स्वातिना व्यक्त (D4 °क्तु)मुत्तर —^{cd}) B3 Dt1 D3 पुष्ययोग- (D3 °गो) B2 वक्ष्यति, D3 वदति, D5 ब्रुवति, M4 ब्रुवते (for वक्ष्यन्ते) V1 B3 G2 देव- (for दैव-) D5 -चिंतना D1 2 4 7 त हि वक्ष्य (D1 °क्ष्य)ति विप्रेन्द्रा(D1 °न्द्रो) दिवस पुष्यसमित

22 ^{a}) Dd1 Dm1 T G3 Cm g k तत (for तत्र) D5 यदा (for पुष्ये) Cr अभिषिच्यस्व, Cm g t as in text Ś1 Ñ2 V1 B D6 त्वमभिषिच्यस्व(B1 °षेच्यश्च), G M1-3 पुष्येभिषि(G1 °षे)च्यस्व (for पुष्येऽभिषिञ्चस्व) D1-4 7 तव चैवाभिषेकार्थं(D4 7 °र्थ), M4 अद्य पुत्राभिषेक्तु त्वा —^{b}) D1 मतिस् , D7 नयम् (for मनस्) D2 च, D5 [इ]ति (for [इ]व) D1 2 5 मे (for माम्) —^{c}) Ś1 अभिषिक्ष्यामि, V1 B1 2 4 अभिषेक्तास्मि Ñ2 श्वस्त्वामभिनिवेक्ष्यामि, D1 श्व एवाभिषेक्ष्यामि (subm), D2 4 7 श्व एव त्वाभिषेक्ष्यामि, D3 एव त्वामभि°, T3 श्वस्त्वा समभिवेक्ष्यामि —^{d}) D1 3 वीर सर्त्विक्पुरोहित , D2 वीर ऋत्विक्पुरोहित (sic), D4 7 वीर मन्त्रिपुरोहितै

